# श्रीमद् भगवद् गीता

## Śrīmad Bha-ga-vad Gī-tā

## Chapter 2 Verses 39 - 72

| | |
|---|---|
| ॐ हरिः ॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | hariḥ om |
| ॐ श्री कृष्णपरमात्मने नमः | om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne namaḥ |
| श्रीमद् भगवद् गीता | śrīmad bha-ga-vad gī-tā |
| अथ द्वितीयोऽध्यायः। | a-tha dvi-tī-yo'dhyā-yaḥ \| |
| साङ्ख्ययोगः। | sāṅ-khya-yo-gaḥ \| |



| | |
|---|---|
| श्रीभगवानुवाच । | śrī-bha-ga-vān-u-vā-ca \| |
| एषा तेऽभिहिता साङ्ख्ये | eṣā te'-bhi-hi-tā sāṅkh-ye |
| बुद्धिर्योगे त्विमां शृणु । | bud-dhir-yoge tvi-māṁ śṛ-ṇu \| |
| बुद्ध्या युक्तो यया पार्थ | bud-dhyā yuk-to ya-yā pār-tha |
| कर्मबन्धं प्रहास्यसि ॥ २-३९ ॥ | karma-ban-dhaṁ pra-hās-yasi \|\| 2-39\|\| |
| नेहाभिक्रमनाशोऽस्ति | nehā-bhi-kra-ma-nā-śo's-ti |
| प्रत्यवायो न विद्यते । | prat-ya-vā-yo na vid-yate \| |
| स्वल्पमप्यस्य धर्मस्य | sval-pam-ap-yas-ya dhar-mas-ya |
| त्रायते महतो भयात् ॥ २-४० ॥ | trā-ya-te ma-ha-to bha-yāt \|\| 2-40\|\| |
| व्यवसायात्मिका बुद्धिः | vya-va-sā-yāt-mi-kā bud-dhiḥ |
| एकेह कुरुनन्दन । | eke-ha kuru-nan-dana \| |
| बहुशाखा ह्यनन्ताश्च | bahu-śākhā hya-nan-tāś-ca |
| बुद्धयोऽव्यवसायिनाम् ॥ २-४१ ॥ | bud-dha-yo'-vya-va-sā-yi-nām \|\| 2-41\|\| |
| यामिमां पुष्पितां वाचं | yā-mi-māṁ puṣ-pi-tāṁ vā-caṁ |
| प्रवदन्त्यविपश्चितः । | pra-va-dant-ya-vi-paś-ci-taḥ \| |
| वेदवादरताः पार्थ | veda-vā-da-ra-tāḥ pār-tha |
| नान्यदस्तीति वादिनः ॥ २-४२ ॥ | nān-ya-das-tī-ti vā-di-naḥ \|\| 2-42\|\| |
| कामात्मानः स्वर्गपराः | kā-māt-mā-naḥ svar-ga-pa-rāḥ |
| जन्मकर्मफलप्रदाम् । | jan-ma-kar-ma-pha-la-pra-dām \| |
| क्रियाविशेषबहुलां | kri-yā-vi-śe-ṣa-ba-hu-lāṁ |
| भोगैश्वर्यगतिं प्रति ॥ २-४३ ॥ | bho-gaiś-var-ya-ga-tiṁ prati \|\| 2-43\|\| |

| | |
|---|---|
| भोगैश्वर्यप्रसक्तानां | bho-gaiś-var-ya-pra-sak-tā-nāṁ |
| तयापहृतचेतसाम् । | ta-yā-pa-hṛ-ta-ce-ta-sām \| |
| व्यवसायात्मिका बुद्धिः | vya-va-sā-yāt-mi-kā bud-dhiḥ |
| समाधौ न विधीयते ॥ २-४४ ॥ | sa-mā-dhau na vi-dhī-ya-te \|\| 2-44\|\| |
| त्रैगुण्यविषया वेदाः | trai-guṇya-vi-ṣa-yā ve-dāḥ |
| निस्त्रैगुण्यो भवार्जुन । | nis-trai-guṇyo bha-vār-juna \| |
| निर्द्वन्द्वो नित्यसत्त्वस्थः | nir-dvand-vo nit-ya-sat-tvas-thaḥ |
| निर्योगक्षेम आत्मवान् ॥ २-४५ ॥ | nir-yo-ga-kṣe-ma āt-ma-vān \|\| 2-45\|\| |
| यावानर्थ उदपाने | yā-vā-nar-tha uda-pā-ne |
| सर्वतः संप्लुतोदके । | sar-va-taḥ sam-plu-to-da-ke \| |
| तावान्सर्वेषु वेदेषु | tā-vān-sar-ve-ṣu ve-de-ṣu |
| ब्राह्मणस्य विजानतः ॥ २-४६ ॥ | brāh-ma-ṇas-ya vi-jā-na-taḥ \|\| 2-46\|\| |
| कर्मण्येवाधिकारस्ते | kar-maṇ-ye-vā-dhi-kā-ras-te |
| मा फलेषु कदाचन । | mā pha-le-ṣu ka-dā-ca-na \| |
| मा कर्मफलहेतुर्भूः | mā kar-ma-pha-la-he-tur-bhūḥ |
| मा ते सङ्गोऽस्त्वकर्मणि ॥ २-४७ ॥ | mā te saṅ-go'st-va-kar-ma-ṇi \|\| 2-47\|\| |
| योगस्थः कुरु कर्माणि | yo-gas-thaḥ ku-ru kar-mā-ṇi |
| सङ्गं त्यक्त्वा धनञ्जय । | saṅ-gaṁ tyakt-vā dha-nañ-jaya \| |
| सिद्ध्यसिद्ध्योः समो भूत्वा | sid-dhya-siddh-yoḥ sa-mo bhūt-vā |
| समत्वं योग उच्यते ॥ २-४८ ॥ | sa-mat-vaṁ yoga uc-ya-te \|\| 2-48\|\| |

| | |
|---|---|
| दूरेण ह्यवरं कर्म | dū-re-ṇa hya-va-raṁ kar-ma |
| बुद्धियोगाद्धनञ्जय । | bud-dhi-yo-gād-dha-nañ-jaya । |
| बुद्धौ शरणमन्विच्छ | bud-dhau śa-ra-ṇam-an-vic-cha |
| कृपणाः फलहेतवः ॥ २-४९ ॥ | kṛ-pa-ṇāḥ pha-la-he-ta-vaḥ ।। 2-49।। |
| बुद्धियुक्तो जहातीह | bud-dhi-yuk-to ja-hā-tī-ha |
| उभे सुकृतदुष्कृते । | ubhe su-kṛ-ta-duṣ-kṛ-te । |
| तस्माद्योगाय युज्यस्व | tas-mād-yo-gā-ya yuj-yas-va |
| योगः कर्मसु कौशलम् ॥ २-५० ॥ | yo-gaḥ kar-ma-su kau-śa-lam ।। 2-50।। |
| कर्मजं बुद्धियुक्ता हि | kar-ma-jaṁ bud-dhi-yuk-tā hi |
| फलं त्यक्त्वा मनीषिणः । | pha-laṁ tyak-tvā ma-nī-ṣi-ṇaḥ । |
| जन्मबन्धविनिर्मुक्ताः | jan-ma-ban-dha-vi-nir-muk-tāḥ |
| पदं गच्छन्त्यनामयम् ॥ २-५१ ॥ | pa-daṁ gac-chant-ya-nā-ma-yam ।। 2-51।। |
| यदा ते मोहकलिलं | ya-dā te mo-ha-ka-li-laṁ |
| बुद्धिर्व्यतितरिष्यति । | bud-dhir-vya-ti-ta-riṣ-ya-ti । |
| तदा गन्तासि निर्वेदं | ta-dā gan-tā-si nir-ve-daṁ |
| श्रोतव्यस्य श्रुतस्य च ॥ २-५२ ॥ | śro-tav-yas-ya śru-tas-ya ca ।। 2-52।। |
| श्रुतिविप्रतिपन्ना ते | śru-ti-vi-pra-ti-pan-nā te |
| यदा स्थास्यति निश्चला । | ya-dā sthās-ya-ti niś-calā । |
| समाधावचला बुद्धिः | sa-mā-dhā-va-ca-lā bud-dhiḥ |
| तदा योगमवाप्स्यसि ॥ २-५३ ॥ | ta-dā yo-gam-avāps-ya-si ।। 2-53।। |

| | |
|---|---|
| अर्जुन उवाच । | arjuna uvāca \| |
| स्थितप्रज्ञस्य का भाषा | sthi-ta-pra-jñas-ya kā bhāṣā |
| समाधिस्थस्य केशव । | sa-mā-dhis-thas-ya ke-śa-va \| |
| स्थितधीः किं प्रभाषेत | sthi-ta-dhīḥ kiṁ pra-bhā-ṣe-ta |
| किमासीत व्रजेत किम् ॥ २-५४ ॥ | kim-ā-sī-ta vra-je-ta kim \|\| 2-54\|\| |
| श्रीभगवानुवाच । | śrī-bha-ga-vān-u-vā-ca \| |
| प्रजहाति यदा कामान् | pra-ja-hā-ti ya-dā kā-mān |
| सर्वान्पार्थ मनोगतान् । | sar-vān-pār-tha ma-no-ga-tān \| |
| आत्मन्येवात्मना तुष्टः | ātman-ye-vāt-ma-nā tuṣ-ṭaḥ |
| स्थितप्रज्ञस्तदोच्यते ॥ २-५५ ॥ | sthi-ta-pra-jñas-ta-doc-ya-te \|\| 2-55\|\| |

| | |
|---|---|
| दुःखेष्वनुद्विग्नमनाः | duḥ-kheṣ-va-nud-vig-na-ma-nāḥ |
| सुखेषु विगतस्पृहः। | su-khe-ṣu vi-ga-ta-spṛ-haḥ \| |
| वीतरागभयक्रोधः | vī-ta-rā-ga-bha-ya-kro-dhaḥ |
| स्थितधीर्मुनिरुच्यते ॥ २-५६ ॥ | sthi-ta-dhīr-mu-ni-ruc-ya-te \|\| 2-56\|\| |
| यः सर्वत्रानभिस्नेहः | yaḥ sar-vat-rā-na-bhi-sne-haḥ |
| तत्तत्प्राप्य शुभाशुभम्। | tat-tat-prāp-ya śu-bhā-śu-bham \| |
| नाभिनन्दति न द्वेष्टि | nā-bhi-nan-da-ti na dveṣ-ṭi |
| तस्य प्रज्ञा प्रतिष्ठिता ॥ २-५७ ॥ | tas-ya pra-jñā pra-tiṣ-ṭhi-tā \|\| 2-57\|\| |
| यदा संहरते चायं | ya-dā saṁ-ha-ra-te cā-yaṁ |
| कूर्मोऽङ्गानीव सर्वशः। | kūr-mo'ṅ-gā-nī-va sar-va-śaḥ \| |
| इन्द्रियाणीन्द्रियार्थेभ्यः | in-dri-yā-ṇīn-dri-yār-thebh-yaḥ |
| तस्य प्रज्ञा प्रतिष्ठिता ॥ २-५८ ॥ | tas-ya pra-jñā pra-tiṣ-ṭhi-tā \|\| 2-58\|\| |
| विषया विनिवर्तन्ते | vi-ṣa-yā vi-ni-var-tan-te |
| निराहारस्य देहिनः। | ni-rā-hā-ras-ya de-hi-naḥ \| |
| रसवर्जं रसोऽप्यस्य | ra-sa-var-jaṁ ra-so'p-yas-ya |
| परं दृष्ट्वा निवर्तते ॥ २-५९ ॥ | pa-raṁ dṛṣṭ-vā ni-var-ta-te \|\| 2-59\|\| |

| | |
|---|---|
| यततो ह्यपि कौन्तेय | ya-ta-to hya-pi kaun-te-ya |
| पुरुषस्य विपश्चितः । | pu-ru-ṣas-ya vi-paś-ci-taḥ \| |
| इन्द्रियाणि प्रमाथीनि | in-dri-yā-ṇi pra-mā-thī-ni |
| हरन्ति प्रसभं मनः ॥ २-६० ॥ | ha-ran-ti pra-sa-bhaṁ ma-naḥ \|\| 2-60\|\| |
| तानि सर्वाणि संयम्य | tā-ni sar-vā-ṇi saṁ-yam-ya |
| युक्त आसीत मत्परः । | yuk-ta ā-sī-ta mat-pa-raḥ \| |
| वशे हि यस्येन्द्रियाणि | va-śe hi yas-yen-dri-yā-ṇi |
| तस्य प्रज्ञा प्रतिष्ठिता ॥ २-६१ ॥ | tas-ya pra-jñā pra-tiṣ-ṭhi-tā \|\| 2-61\|\| |
| ध्यायतो विषयान्पुंसः | dhyā-ya-to vi-ṣa-yān-puṁ-saḥ |
| सङ्गस्तेषूपजायते । | saṅ-gas-te-ṣū-pa-jā-ya-te \| |
| सङ्गात्सञ्जायते कामः | saṅ-gāt-sañ-jā-ya-te kā-maḥ |
| कामात्क्रोधोऽभिजायते ॥ २-६२ ॥ | kā-māt-kro-dho-'bhi-jā-ya-te \|\| 2-62\|\| |
| क्रोधाद्भवति सम्मोहः | kro-dhād-bha-va-ti sam-mo-haḥ |
| सम्मोहात्स्मृतिविभ्रमः । | sam-mo-hāt-smṛ-ti-vi-bhra-maḥ \| |
| स्मृतिभ्रंशाद् बुद्धिनाशः | smṛ-ti-bhraṁ-śād bud-dhi-nā-śaḥ |
| बुद्धिनाशात्प्रणश्यति ॥ २-६३ ॥ | bud-dhi-nā-śāt-pra-ṇaś-ya-ti \|\| 2-63\|\| |

| | |
|---|---|
| रागद्वेषवियुक्तैस्तु | rā-ga-dve-ṣa-vi-yuk-tais-tu |
| विषयानिन्द्रियैश्चरन् । | vi-ṣa-yān-in-dri-yaiś-ca-ran । |
| आत्मवश्यैर्विधेयात्मा | āt-ma-vaś-yair-vi-dhe-yāt-mā |
| प्रसादमधिगच्छति ॥ २-६४ ॥ | pra-sā-dam-adhi-gac-cha-ti ।। 2-64।। |
| प्रसादे सर्वदुःखानां | pra-sā-de sar-va-duḥ-khā-nāṁ |
| हानिरस्योपजायते । | hā-ni-ras-yo-pa-jā-ya-te । |
| प्रसन्नचेतसो ह्याशु | pra-san-na-ce-ta-so hyā-śu |
| बुद्धिः पर्यवतिष्ठते ॥ २-६५ ॥ | bud-dhiḥ par-ya-va-tiṣ-ṭha-te ।। 2-65।। |
| नास्ति बुद्धिरयुक्तस्य | nās-ti bud-dhi-ra-yuk-tas-ya |
| न चायुक्तस्य भावना । | na cā-yuk-tas-ya bhā-va-nā । |
| न चाभावयतश्शान्तिः | na cā-bhā-va-ya-taś-śān-tiḥ |
| अशान्तस्य कुतः सुखम् ॥ २-६६ ॥ | a-śān-tas-ya ku-taḥ su-kham ।। 2-66।। |
| इन्द्रियाणां हि चरतां | in-dri-yā-ṇāṁ hi ca-ra-tāṁ |
| यन्मनोऽनुविधीयते । | yan-ma-no'-nu-vi-dhī-ya-te । |
| तदस्य हरति प्रज्ञां | ta-das-ya ha-ra-ti pra-jñāṁ |
| वायुर्नावमिवाम्भसि ॥ २-६७ ॥ | vā-yur-nā-vam-i-vām-bha-si ।। 2-67।। |

तस्माद्यस्य महाबाहो — tas-mād-yas-ya ma-hā-bā-ho

निगृहीतानि सर्वशः । — ni-gṛ-hī-tā-ni sar-va-śaḥ ।

इन्द्रियाणीन्द्रियार्थेभ्यः — in-dri-yā-ṇīn-dri-yār-thebh-yaḥ

तस्य प्रज्ञा प्रतिष्ठिता ॥ २-६८ ॥ — tas-ya pra-jñā pra-tiṣ-ṭhi-tā || 2-68||

या निशा सर्वभूतानां — yā ni-śā sar-va-bhū-tā-nāṁ

तस्यां जागर्ति संयमी । — tas-yāṁ jā-gar-ti saṁ-ya-mī ।

यस्यां जाग्रति भूतानि — yas-yāṁ jā-gra-ti bhū-tā-ni

सा निशा पश्यतो मुनेः ॥ २-६९ ॥ — sā ni-śā paś-ya-to mu-neḥ || 2-69||

आपूर्यमाणमचलप्रतिष्ठं — ā-pūr-ya-mā-ṇam-aca-la-pra-tiṣ-ṭhaṁ

समुद्रमापः प्रविशन्ति यद्वत् । — sa-mu-dram-ā-paḥ pra-vi-śan-ti yad-vat ।

तद्वत्कामा यं प्रविशन्ति सर्वे — tad vat-kā-mā yaṁ pra-vi-śan-ti sar-ve

स शान्तिमाप्नोति न कामकामी ॥ २-७० ॥ — sa śān-tim-āp-no-ti na kā-ma-kā-mī || 2-70||

विहाय कामान्यः सर्वान् — vi-hā-ya kā-mān-yaḥ sar-vān

पुमांश्चरति निस्स्पृहः । — pu-mānś-ca-ra-ti nis-spṛ-haḥ ।

निर्ममो निरहङ्कारः — nir-ma-mo ni-ra-haṅ-kā-raḥ

स शान्तिमधिगच्छति ॥ २-७१ ॥ — sa śān-tim-adhi-gac-cha-ti || 2-71||

| | |
|---|---|
| एषा ब्राह्मी स्थितिः पार्थ | eṣā brāh-mī sthi-tiḥ pār-tha |
| नैनां प्राप्य विमुह्यति । | nai-nāṁ prāp-ya vi-muh-ya-ti । |
| स्थित्वास्यामन्तकालेऽपि | sthit-vās-yām-anta-kā-le'-pi |
| ब्रह्मनिर्वाणमृच्छति ॥ २-७२ ॥ | brah-ma-nir-vā-ṇa-mṛc-cha-ti ।। 2-72।। |

| | |
|---|---|
| ॐ तत्सत् | om tat-sat |
| इति श्रीमद्भगवद्गीतासु | iti śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु | upa-ni-ṣat-su |
| ब्रह्मविद्यायां | brahma-vid-yā-yāṁ |
| योगशास्त्रे | yoga-śās-tre |
| श्रीकृष्णार्जुनसंवादे | śrī-kṛṣ-ṇār-juna-saṁ-vā-de |
| साङ्ख्य योगो नाम | sāṅ-khya yo-go nā-ma |
| द्वितीयोऽध्यायः । | dvi-tī-yo'dhyā-yaḥ । |
| ॐ हरिःॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī guru-bhyo namaḥ |
| हरिः ॐ | hariḥ om |



| | |
|---|---|
| सर्वधर्मान्परित्यज्य | sar-va-dhar-mān-pari-tyaj-ya |
| मामेकं शरणं व्रज । | mām-ekaṁ śara-ṇaṁ vra-ja । |
| अहं त्वा सर्वपापेभ्यः | ahaṁ tvā sar-va-pā-pebh-yaḥ |
| मोक्ष्ययिष्यामि मा शुचः ॥ १८-६६ ॥ | mokṣ-ya-yiṣ-yā-mi mā śu-caḥ ।। 18-66।। |